# Sadbhih Krita Shri Hari Stuti

# सद्भिः कृता श्रीहरिस्तुतिः

## Document Information

Text title : Sadbhih Krita Shri Hari Stuti

File name : sadbhiHkRRitAshrIharistutiH.itx

Category : vishhnu, svAminArAyaNa, krishna, stuti, aShTaka

Location : doc_vishhnu

Acknowledge-Permission: Swaminarayan Sampradaya

Latest update : August 8, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 9, 2024

*sanskritdocuments.org*

# सद्भिः कृता श्रीहरिस्तुतिः

षड्चत्वारिंशत्तमे तरङ्गे लब्धाकृता श्रीहरिस्तुतिः सम्पूर्णा ।

सम्बन्धात्ते नाथ वृक्षाः सरोऽदः सर्वे चेमेऽत्राधुना भूमिकेयम् ।
सौधश्चायं वाटिका वापिकेयं धन्यं सर्वं चाश्रमः क्षेत्रमेतत् ॥ १॥

चित्तं नोऽहन्धीर्मनस्त्वक् च नेत्रे घ्राणं जिह्वा कर्णयुग्मं च तीक्ष्णम् ।
एतान्यन्यच्चापि सर्वं कदाचिद् वल्गान्त्वन्यं त्वां विना नैव धार्मे ॥ २॥

यस्यापाराः सद्गुणाः शुभ्रकीर्तिर्ज्ञानं धर्मो यस्य वैराग्यमीश ।
भक्तिर्यद्वाग् यच्चरित्राणि यच्छं यन्माहात्म्यं रूपधामानि यस्य ॥ ३॥

सर्वस्यैतस्यापि लेशं च किञ्चिद् वक्तुं शेषो नाम देवो हि तस्य ।
शक्तस्ते किं देव्यपि स्याच्च तद्धीस्तस्याऽऽनन्त्यात्त्वां तु वन्दामहे यत् ॥ ४॥

कामः क्रोधो दुस्त्यजो मानलोभौ स्वादो गर्वो मत्सरो दम्भ एते ।
उर्जिष्ठा नः सञ्जिता दस्यवोऽस्मिँस्ताद्दत्तेजा यह शैकस्त्वमेव ॥ ५॥

ज्योतिर्दीप्तं घूर्णते शैशुमारं चक्रं चेदं यस्य सङ्कल्पतः खे ।
नित्यं तोये कुः स्थिरेयं स्थितापि त्वं नः स्वामी स्मोऽस्यतः सोऽतिधन्याः ॥ ६॥

तं तं तन्तुषु ग्रन्थितोऽङ्ग त्वय्याधारेऽदः पटश्चेव विश्वम् ।
भिन्नोऽस्यस्मात्त्वं तथापीश्वरो नो दृष्टस्त्वय्यस्यापि को यद्गुणो न ॥ ७॥

स्वामिन् ब्रह्माण्डानि वै कालवेगान्नाशं यान्त्यत्योजसो यर्हि धानि ।
दिव्ये जुष्टः शिष्यते वासुदेवः स्वैः स्वे यो नः प्राणवत् स प्रियः स्तात् ॥ ८॥

इति श्रीस्वामिनारायणबापाचरित्रामृतसागरे तृतीयप्रवाहे
पञ्चाशत्तमे तरङ्गे सद्भिः कृता श्रीहरिस्तुतिः सम्पूर्णा ।

*Sadbhih Krita Shri Hari Stuti*

pdf was typeset on August 9, 2024

Please send corrections to *sanskrit@cheerful.com*